मान्येभ्यः प्राचार्यवर्येभ्यः
आदरमुपायनी क्रियते — S. Paul

# दिवाकरद्युतिः

## (वेदमार्तण्डाचार्यदिवाकरमहापात्राभिनन्दनग्रन्थः)


सम्पादकः
डॉ.शत्रुघ्नपाणिग्राही

सम्पादकमण्डलम्
डॉ.कृपासिन्धुपण्डा
डॉ.रामचन्द्रहोता
डॉ.भीमसेनसाहु
डॉ.निरञ्जनमिश्रः
डॉ. गिरीधारीपण्डा



प्रकाशिका
अर्वाचीनसंस्कृतसाहित्यपरिषद्
सी ६२, अक्षरधाम टेनामेन्ट्स,
मथुरानगरी समीप, अक्षरचोक,
वडोदरा, गुजरात. 390020





Scanned with CamScanner

दिवाकरद्युतिः

(वेदमार्तण्ड-आचार्यदिवाकरमहापात्राभिनन्दनग्रन्थः)

प्रकाशिका –
अर्वाचीनसंस्कृतसाहित्यपरिषद्
सी ६२, अक्षरधाम टेनामेन्ट्स,
मथुरानगरी समीप, अक्षरचोक,
वडोदरा, गुजरात. 390020
२०१६

ISBN :978-93-827 13-15-9

प्रतिलिपयः - ३००
प्रकाशनवर्षम् – २०१६
मूल्यम् – ५००
प्राप्तिस्थानम् – वेदनिकेतनम्, लुहागडजागा, शंकरानन्दमथलेन्
तिआडिसाहि, पुरी- ७५२००१ , ओडिशा
दूरभाषा- ०९४३७६९७५३०

मुद्रणम् – Pagemaker Computer Services
117, Bapuji Nagar, Bhubaneswar - 751009



Scanned with CamScanner

# संस्कृतवाङ्मये मनोवैज्ञानिकः अभिगमः

डॉ. नरेन्द्रकुमार एल. पण्ड्या

संस्कृतवाङ्मयमितिविशालं बहुविधविषयविशदीकरणशीलं सर्वाङ्गीणं साहित्यमस्ति इति विदुषां नाऽविदितम् । तत्राऽपि सर्वज्ञानमयेषु वेदेषु सर्वमेव ज्ञानं निहितमस्ति अत एव वेदाः अस्माकं कृते ज्ञाननिधयो भवन्ति । मानवानां मनसि कतिविधाः विचारा आविर्भवन्ति तदपि तत्र अनेकविधरीत्या निरूप्यते । सामान्यतः सर्वेषामपि प्राणभृतां जीवानामियमभीप्सा जायते यत् मम सूखं भूयात् दुःखं मा भूत् इति । सुखमिष्टं दुःख चाऽनिष्टं भवति । सुखदुःखोपलब्धिस्तु मनसा साधनेन भवति । मनसि सुखजनिकाः कीदृश्यः इच्छाः भवन्ति तदनुसारं के के भावाः अनुभावाः सञ्चारिणश्च भावा मनसि समुत्पद्यन्ते तदपि सुचारुतया निरूपितमस्ति । इदं सर्वं मनोवैज्ञानिकाभिगमदृष्ट्या अपि विचारयितुं शक्यते ।

**मनोविज्ञानस्य परिभाषा**

मनोविज्ञानपदस्यार्थः संस्कृतव्याकरणशास्त्रदृष्ट्या विचार्यते चेत् अयं भवति यत् मनः सम्बन्धि विशिष्टं ज्ञानम् । तच्च मनसः स्वरूपं, कारणं, कार्यं , सहकारिणः , परिणामः , प्रयोजनम् , गुणाः, प्रकृतिः, विकृतिः, समर्थ्यं, व्यवहारः इत्यादिकं मनः सम्बन्धि यद्यत् भवति तद्विषयकं , विशिष्टम् अनुभवात्मकं सप्रमाणं वैज्ञानिकपद्धत्यनुसारं ज्ञानं मनोविज्ञानं भवति ।

Wikipedia इत्याख्ये निःशुल्कविश्वकोशे जालपुटे psychology इति शब्दस्य , आङ्ग्लभाषायां मनोविज्ञानार्थे प्रयुज्यमानस्य , एवमर्थोऽभिहितः " psychology is the study of mind and behavior." "The psychology derives from Greek roots meaning study of psyche , or soul. " In 1890 William James defined psychology as "the science of mental life, both of its phenomena and their conditions.''

इत्थं psychology इति आङ्ग्लशब्दस्य व्युत्पत्तिः विभावना च दृश्यते । संस्कृत-वाङ्मयमपि सुखदुःखाद्युपलब्धिसाधनतयाबन्धमोक्षकारणतया सङ्कल्पविकल्पात्मकतया च मनः परिभाषते ।



Scanned with CamScanner

**वेदनिरूपितमन: सङ्कल्पा:**

मनसि अविरतं समुद्रे तरङ्गा इव सङ्कल्पा: उत्पद्यन्ते विलीयन्ते च । तत्र कीदृग्विधा: सङ्कल्पा: मनसि जायन्ते इति वेदमाश्रित्य विलोक्यते चेत् 'तत्सवितुर्वरेण्यम् ... इति (यजु.३/३५ , एवं ३०/२ ) मन्त्रे अथ च " युञ्जते मन उत युञ्जते धियो विप्रा विप्रस्य बृहतो व्विपश्चित:। (यजु: ११/४ ) इति मन्त्रे ध्यानस्य चिन्तनस्य धीवृत्ते: प्रेरणा सवितु: सूर्यस्य ध्यानेन प्राप्यते इति निरूपितम् । वैदिकसाहित्यस्य बीजभूतमन्त्रतय गायत्रीमन्त्रस्योपादेयता विद्यते । "अग्ने व्रतपते व्रतञ्चरिष्यामि....(यजो१/५) इत्यत्र अनृतात् सत्योपायनं प्रतिज्ञातम् । " अवतत्य धनुष्ट्वं ...(यजु: १६/१३ ) इत्यत्र मन्त्रे शिवं प्रति अभिप्रार्थ्यते यत् हे सहस्राक्ष: ! शतेषुधे ! शिव ! मां प्रति शिव: सुमना: भवेति । " ये समाना: समनसो जीवा जीवेषु मामका: । तेषां श्रीर्म्मयि कल्ल्पतामस्म्मिर्ल्लोके शतं समा: ॥ (यजु. १९/४७) इत्यत्र शतं समा: समानानां श्री: कल्पिता । इदं हवि: प्रजननम्मे .....(यजु.१९/४८) इत्यत्र दशवीर सन्ततिप्रजनन – सर्वगणस्वस्ति – प्रजासनि-पशुसनि-लोकसन्यभयसनिबहुलप्रजाकरणान्नपयोरेतोधानानामभ्यर्थनाऽग्निं प्रति विधीयते। यजुर्वेदस्य विंशाध्यायस्य चतुर्दश-पञ्चदश-षोडशमन्त्रेषु देवहेडनानां दिवा नक्तं च कृतानां , जाग्रत्स्वप्नकृतानां एनसां विमोचनाय अग्निवायुसूर्यदेवता: प्रार्थ्यन्ते । "सुमित्रिया न आप ओषधय: सन्तु ..... (यजु.२०/१९) इत्यत्र आप: स्वस्मै सुमित्रिया: सन्तु दुर्जनेभ्य: दुर्मित्रिया: सन्तु इति आप: प्रार्थ्यन्ते । " आप: शुन्धन्तु..." (यजु.२०/२०) इत्यत्र एन: शोधनाय आप: प्रार्थ्यन्ते । " महाँशाऽइन्द्रोवज्रहस्त: षोडशी शर्म्म यच्छतु...." (यजु.२६/१०) इत्यत्र इन्द्रं प्रति शर्म्मप्रदानाय प्रार्थना विधीयते । "विभक्तारं हवामहे व्वसोश्चित्रस्य राधस: (यजु.३०/४१) इत्यत्र विविधवसुप्रार्थना सूर्यं देवं प्रति विधीयते । "मेधाम्मेव्वरुणो ददातु ... (यजु.३२/१५) इत्यत्र मेधादानाय वरुणादय: सम्प्रार्थ्यन्ते देवा: । इदम्मे ब्रह्म च क्षत्रञ्च .....(यजु.३२/१६) इत्यत्र देवा: स्वस्मिन् श्रियमाधातुं प्रार्थ्यन्ते ।

एवंविधेषु वैदिकेषु मन्त्रेषु प्राणभृतां जीवानां मनसि कीदृशा: कीदृशा: सङ्कल्पा: समुद्भवन्तीति प्रार्थनारूपेण प्रतिपाद्यते । तत्र सङ्क्षेपेण इदं वक्तुं शक्यते यत् आयुरारोग्यैश्वर्यप्रजामेधाशत्रुनिराकरणादिका: भवन्ति मनसि मनोरथा: इति ।

**वेदनिरूपितं मन: स्वरुपम् -**



Scanned with CamScanner

वेदे मनसः स्वरूपनिरूपणमपि दृश्यते । तत्र यजुर्वेदे चतुस्त्रिंशाध्याये षट्सु मन्त्रेषु " तन्मे मनः शिवसङ्कल्पमस्तु (यजु. ३४/१ तः ६ मन्त्राः ) इति ध्रुववाक्येन सह मनसः स्वरूपं निरूप्यते । तदनुसारं जाग्रत्स्वप्नयोः मनः सुदूरं याति , तेन दूरङ्गमं ज्योतिषामपि ज्योतिः , येन कर्म्माणि कर्तुं कर्मिणः सुधियः प्रभवन्ति , येन विना किमपि कर्म्म कर्तुं शक्यते , येन भुवनं , भूतं , भविष्यच्च परिगृहीतं वर्तते, यस्मिन् ऋचो यजूंसि सामानि प्रतिष्ठितानि सन्ति , यत् सुषारथिः अश्वान् इव मनुष्यान् नेनीयते तत् अजिरं जविष्ठं मनः शिवसङ्कल्पमस्तु इति ऋषिः प्रार्थ्यते । एषु मन्त्रेषु शिवसङ्कल्पाभिलाषेण समं मनसः वैदिकं स्वरूपमपि सुष्ठु प्रतिपादितं भवति । " सुषारथिरश्वानिव...(यजु.३४/६) इति मन्त्रे सुन्दरतया उपमालङ्कारः प्रयुक्तो दृश्यते । इत्थं इह सालङ्कारं मनोनिरूपणं विहितमस्ति ।

**उपनिषत्सु मनोनिरूपणम् -**

" ईशावास्यमिदं सर्वं ....(ईशा.१) इत्यत्र ईशावास्योपनिषदि मा ग्रधः कस्यस्विद्धनम् इति प्रार्थनया उपदेशेन वा आदेशेन वा सामन्यतो मनसि परधनगर्धना अवतिष्ठते सा निषिध्यते । "कुर्वन्नेवेह कर्म्माणि ....(ईशा.२) इत्यत्र मन्त्रे कश्चित् प्रमादं न कुर्यात् शतवर्षाणि जिजीविषेत् कर्म्माणि च अनुतिष्ठेत् इति उपनिषदेषोपदिशति । "शतायुषः पुत्रपौत्रान् वृणीष्व बहून् पशून् हस्तिहिरण्यमश्वान् । भूमेर्महदायतनं वृणीष्व स्वयं जीव शरदो यावदिच्छसि ॥ (कठो.१/१/२३) इत्यत्र यमराजः नचिकेतसं प्रति तादृशवराणां वरणाय कथयति सामान्यतः मनुष्याणां मनसि यान् वरान् प्राप्तुं समीहा सञ्जायते । "न वित्तेन तर्पणीयो मनुष्यो लप्स्यामहे वित्तमद्राक्ष्म चेत्त्वा । जीविष्यामो यावदीशिष्यसि त्वं वरस्तु मे वरणीयः स एव ॥ (कठो. १/१/२७) इत्यत्र कियताऽपि वित्तेन मनुष्यस्तर्पणीयो न भवति इति सनातनं सत्यमभिधीयते । "यदा पञ्चाऽवतिष्ठन्ते ज्ञानानि मनसा सह । बुद्धिश्च न विचेष्टते तामाहुः परमां गतिम् ॥ (कठो. २/३/१०) ज्ञानेन्द्रियाणां मनसो बुद्धेश्चाऽवस्थानं स्थैर्यं अचाञ्चल्यमत्र प्रशस्यते । " यदा सर्वे प्रमुच्यन्ते कामा येऽस्य हृदि श्रिताः। अथ मर्त्योऽमृतो भवति एतावद्ध्यनुशासनम् ॥(कठो. २/३/१५) अस्मिन् औपनिषदे मन्त्रे सर्वेषां हृदि श्रितानां कामानां प्रयोजनस्य प्राशस्त्यं तेन मर्त्यस्य अमृतभावः इति निरूप्य मनसः उत्तमा स्थितिः का भवतीति प्रतिपाद्यते । " कामान् यः



Scanned with CamScanner

कामयते मन्यमानः स का मभिर्जायते तत्र तत्र । पर्याप्तकामस्य कृतात्मनस्त्विहैव सर्वे प्रविलीयन्ते कामाः ॥ (मुण्डक.३/२) इत्यत्र मन्त्रे पर्याप्तकामस्य सर्वे कामा विलीयन्ते इत्युक्त्वा निष्कामतायाः प्रशंसा क्रियते । मनसः स्वरूपविषये छान्दोग्योपनिषदि निरूपितं यत् '' अन्नमयं हि सौम्य मन इति ॥ (छान्दो.६/८/२) एवं अन्नमयं मन इति निरूप्य मनः प्राणबन्धनं अस्तीति निरूप्यते यथा " स यथा शकुनिः सूत्रेण प्रबद्धो दिशं दिशं पतित्वाऽन्यत्रायतनमलब्ध्वा ....प्राणमेवोपश्रयते प्राणबन्धनं हि सौम्य मन इति । (छान्दो.६/८/२) अत्र मनसः बन्धनं प्राणाः सन्तीति कथ्यते । मनो विषये निरूपयन्ती छान्दोग्योपनिषदपरमपि आह " मनसा पश्यति मनसा शृणोति इति ॥ (छान्दो. ६/८/२) जीवः मनसा पश्यति मनसा च शृणोति यदि कश्चित् अन्यत्रमना भवति तदा सम्मुखावस्थितमपि वस्तु न पश्यति न शृणोति च । बृहदारण्यकोपनिषदि " कामः सङ्कल्पो विचिकित्सा श्रद्धाऽश्रद्धा धृतिरधृतिर्ह्रीर्धीर्भीरित्येतत् सर्वं मन एव । (बृहदा. १/५/३) । मनो यजुर्वेदः इति निरूप्यते ॥ वागेवर्ग्वेदो मनो यजुर्वेदः प्राणः सामवेदः । (बृहदा. १/५/५) इत्थम् उपनिषत्सु मनोविषये भूरि निरूपणं विहितमस्ति ।

**भगवद्गीतायां भागवते च मनोनिरूपणम् ।**

भगवद्गीतायां भगवन्तं च श्रीकृष्णं प्रति अर्जुनेन मनसः चाञ्चल्यं प्रमादित्वमित्यादिविषये निरूपितमस्ति । " चञ्चलं हि मनः कृष्ण प्रमाथि बलवद्दृढम् । तस्याहं निग्रहं मन्ये वायोरिव सुदुष्करम् । (भ.गी. ६/३५) एतस्य मनसः अभ्यासवैराग्याभ्यां निग्रहो जायते इति भगवता श्रीकृष्णेन समाहितम् । श्रीमद्भागवते अपि दानादिसर्वविधधर्माणां मनोनिग्रहलक्षणफलकत्वं निरूपितं तथा च मनसः समाधिः परो योगः, मनः सुखदुःखादिकस्य परं कारणमिति भिक्षुगीते एकादशे अध्याये निरूपितम् । उद्धवश्च भगवता मनोनिग्रहाय उपदिष्टः " तस्मात् सर्वात्मना तात निगृहाण मनो धिया । मयावेशितया युक्त एतावान् योगसङ्ग्रहः॥ (भाग. ११/२३/६१) । मनसः निष्कामता कथं सम्पादनीयेति श्रीमद्भागवतं उपदिशति यथा " प्राणापानौ सन्निरुन्ध्यात् पूरकुम्भकरेचकैः । यावन्मनस्त्यजेत्कामान् स्वनासाग्रनिरीक्षणः ॥ यतो यतो निःसरति मनःकामहतं भ्रमत् । ततस्ततः उपाहृत्य हृदि रुन्दध्याच्छनैर्बुधः ॥



Scanned with CamScanner

एवमभ्यसतश्चित्तं कालेनाल्पीयसायते: । अनिशं तस्य निर्वाणं यात्यनिन्धनवह्निवत् ॥ (भग. ७/१५/३२,३३,३४)

अत्र इदं प्रतिपाद्यते यत् मन: कामहतं सत् यदा इत: तत: भ्रमति तदा तस्य योगिना हृदि निरून्धनं कर्तव्यम् । तत्र प्राणायाम: परं बलं भवति । एवमभ्यासेन अनिन्धनवह्निवत् अल्पीयसा कालेन मन: निर्वाणं याति ।

**उपसंहार: -**

इत्थमिह द्रष्टुं शक्यते यत् संस्कृतवाङ्मये वैदिकसाहित्ये स्मृतौ पुराणे च मनस: स्वरूपं तस्य परिणाम: निग्रह: साक्षीभाव: इत्यादिविषये सम्यगुपपादनं वर्तते । विशेषतया मनोविषये संस्कृतवाङ्मयेन बहु बहु विचार: विमर्शश्च कृत: इति वाङ्मयावगाहनेन विशदं भवति ।

**सन्दर्भग्रन्था:**


१) यजुर्वेद:

२) कठोपनिषद्

३) ईशावास्योपनिषद्

४) मुण्डकोपनिषद्

५)छान्दोग्योपनिषद्

६)बृहदारण्यकोपनिषद्

७)भगवद्गीता

८)श्रीमद्भागवतमहापुराणम्

९) Wikipedia



प्राचार्य:

श्री सोमनाथसंस्कृतयुनोवेर्सिटी

कोलेज , वेरावल , गुजरातम्


Scanned with CamScanner